# A-II/1/2410/ 21

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. भाट्टमते शब्दः किंरूपः?
2. स्फोटः शब्दः इति के वदन्ति?
3. शब्दस्य केन सह नित्यसम्बन्धः?
4. शब्दग्राहकमिन्द्रियं किम्?
5. अभिहितान्वयवादिनः के?
6. भाष्योक्तं शब्दलक्षणं किम्?
7. बौद्धमते शब्दः नित्यो वा? किंरूपः?
8. शब्दस्य नित्यत्वे अनुमानं किम्?
9. को नाम विधिः?
10. शब्दे विद्यमानः धर्मः कः?
11. नित्यकर्मणां किं फलम्?

**अथवा**

नामधेयत्वे कति निमित्तानि?

12. किं नाम अन्विताभिधानम्?

**अथवा**

प्रभाकरमते कति प्रमाणानि?

13. प्रयाजाः कस्मिन्प्रकरणे पठिताः? के च ते?

**अथवा**

सोमयागस्य किं फलम्? तत्र वचनं किम्?

14. काठकसमाख्याया: पूर्वपक्षे अर्थ: क:?

**अथवा**

किं नाम अवान्तरप्रकरणम्?

15. श्येनयागविधायकं वाक्यं किम्?

**अथवा**

दर्शे कति प्रधानयागा:? के च ते?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. शब्दस्यानित्यत्वे प्रमाणं सङ्गृहीत।

17. "युगपदेशभेदस्य स्यादेकस्यापि सूर्यवत्" - प्रघट्टकमिमं यथाग्रन्थं विवृणुत।

**अथवा**

शब्दस्य क्षणिकत्वखण्डनपुरस्सरं प्रत्यक्षत्वं प्रतिपादयत।

18. वर्णानामनवयवत्वे नित्यत्वे च युक्ती: प्रदर्शयत।

**अथवा**

शब्दत्वस्य जातित्वे युक्ती: प्रदर्शयत।

19. धर्मे चोदनाया: अप्रामाण्यं यथाग्रन्थं निरूपयत।

**अथवा**

लक्षणया वाक्यार्थ इति मतं सप्रसङ्गं व्याख्यात।

20. वेदस्य अपौरुषेयत्वं सप्रसङ्गं विवृणुत।

**स. निबन्धात्मक: प्रश्न: समाधेय:।** **(1×20=20)**

21. धर्मशब्दस्य व्युत्पत्तिं प्रदर्श्य साकल्येन तन्निरूपणं कुरुत।

**अथवा**

अङ्गताग्राहकप्रमाणानि कानि? विस्तरेण विवेचयत।

**अथवा**

पर्युदास: क:? विशदयत।

# A-II/2/2411/ 21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कः विनियोगः।
2. वाक्यलक्षणं परिष्कुरुत।
3. अङ्गाङ्गिभावबोधकानि प्रमाणानि कानि ?
4. भक्षपेटिकायाः विषयवाक्यार्थं वर्णयत।
5. इन्दपीताधिकरणं कया सङ्गत्या उपक्रमते।

**अथवा**

उपक्रमाधिकरणसूत्रार्थं वर्णयत।

6. का नाम समाख्या ?
7. इन्द्राग्नी रोचना दिवः इत्यादिमन्त्राः कस्मिन् प्रकरणे आम्नाताः ?
8. आग्नेय्याधिकरणस्य संशयबीजं किम् ?

**अथवा**

आग्नेय्याधिकरणस्य विषयं स्पष्टीकुरुत।

9. त्रिंशदधिकरणस्य का प्रसक्तिः ?
10. स्थानप्रमाणस्य भेदान् प्रदर्शयत।
11. किं नाम प्रकरणम् ?

**अथवा**

किं नाम स्थानम् ?

12. स्थानसमाख्याविरोधे किमुदाहरणम् ?

**अथवा**

बलाबलाधिकरणसूत्रं लिखत।

13. किं नाम याजमानमन्त्रकाण्डम् ?

14. तार्तीयः बाधः कथं विशिष्यते ?

15. ज्योतिष्टोमे रूपद्वयं किम् ?

**अथवा**

दर्शपूर्णमासस्थान् षट्प्रधानयागान् लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. लिङ्गक्रमसमाख्याधिकरणसारं वर्णयत।

17. गुणमुख्यव्यतिक्रमाधिकरणे भाष्यकारमतं निरूपयत।

**अथवा**

"प्रकरणं नाम चतुर्थं प्रमाणम्" स्थापयत।

18. आग्नेय्याधिकरणं विवेचयत।

19. भक्षपेटिकां व्याख्यात।

**अथवा**

विनियोगविधेः स्वरूपं विवेचयत।

20. वाक्यप्रकरणयोः विरोधे बलाबलं विवेचयत।

**अथवा**

समाख्यां व्याख्यात।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. उच्चैष्ट्वादीनां वेदधर्मत्वं निरूपयत।

**अथवा**

श्रुत्यादीनि प्रमाणानि विवेचयत।

**अथवा**

मीमांसाकौस्तुभग्रन्थस्य वैशिष्ट्यं प्रतिपादयत।

# A-II/3/2412/ 21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. नैयायिकाः शाब्दबोधे कस्य मुख्यविशेष्यत्वं स्वीकुर्वन्ति ?
2. अभिमुखत्वं कस्याः विभक्तेरर्थः ?
3. प्रातिपदिकार्थस्य कुत्र अन्वयः ?
4. षष्ठीविभक्तेः कोऽर्थः ?
5. कर्तृकर्मणोः कृतीत्यस्य उदाहरणद्वयं दर्शयत।
6. ध्रुवमपायेऽपादानमित्यस्य कोऽर्थः ? किञ्चोदाहरणम् ?
7. द्वितीयाविभक्तिविधायकसूत्रद्वयं सोदाहरणमुल्लिखत।
8. चतुर्थीविधायकसूत्रद्वयं सोदाहरणं लिखत।
9. अधीगर्थदयेशां कर्मणि इति सूत्रस्य उदाहरणं लिखत।

**अथवा**

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु इत्यस्य उदाहरणं लिखत।

10. वायौ रूपं नास्तीत्यस्य शाब्दबोधं लिखत।

**अथवा**

चैत्रो न पचतीत्यस्य शाब्दबोधं लिखत।

11. चतुर्थ्या देवतात्वं कथं लभ्यते ?

**अथवा**

किं नाम कर्मत्वम् ?

12. कात्यायनमते प्रथमार्थः कः ?

**अथवा**

हरये रोचते भक्तिः – अत्र कथं चतुर्थी ?

13. पञ्चम्याः कोऽर्थः?

14. प्रतिपदविधानषष्ठीमुदाहरत।

**अथवा**

'ज्ञोऽविदर्थस्य करणे' इत्यस्य उदाहरणं लिखत।

15. मासमास्ते इत्यत्र कथं द्वितीया?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कात्यायनमतेन प्रथमार्थं निरूप्य तस्य अन्वयं विचारयत।

17. तृतीयाविधायकसूत्रत्रयं सोदाहरणं व्याख्यात।

18. करणत्वनिर्वचनविचारं दर्शयत।

**अथवा**

कर्मणा यमभिप्रैतीत्यादिसूत्रार्थं विचारयत।

19. धारेरुत्तमर्णः स्पृहेरीप्सितः इति सूत्रद्वयार्थं सोदाहरणं प्रतिपादयत।

**अथवा**

तुमर्थाच्च भाववचनात् इति सूत्रार्थं सोदाहरणं प्रतिपादयत।

20. "नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्चे"ति सूत्रार्थं सोदाहरणं विवृणुत।

**अथवा**

किं नाम अधिकरणत्वमिति विचारयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. कर्तृकर्मणोः कृतीत्यत्र कृद्ग्रहणप्रयोजनं विचारयत।

**अथवा**

संबोधनप्रथमार्थं विचारयत।

**अथवा**

अपादानत्वपरिष्कारं निरूपयत।

# A-II/4/2413/ 21

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। निम्नलिखितानाम् अर्थविवरणं कुरूत- (15×2=30)**

1. नानुमार्ष्टि।
2. यागः।
3. सामिधेनीस्वरः।
4. अन्वग्रम्।
5. जिह्मः।
6. पापीयान्।
7. कनिष्ठिनेयः।
8. प्रतिपादयति।
9. प्राशित्रम्।
10. नियष्ठति।
11. पत्नीसंयाजाः।

**अथवा**

निषेधः

12. सर्वप्रायश्चित्तम्।

**अथवा**

अधिकारविधिः।

13. लिङ्गम्।

**अथवा**

अनवक्रामम्।

14. होमः।

**अथवा**

कल्पः।

15. प्रयोगविधिः।

**अथवा**

नियमविधिः।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. प्रस्तरपाणिः संसृष्टान् परिधीन् परिदधाति गन्धर्वोऽसि विश्वावसुरित्येतैः प्रतिमन्त्रमुदगग्रं मध्यमं प्रागग्रावितरौ। व्याख्यात।

17. वेदेन भस्म प्रमृज्य तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः इति पात्र्यां प्रतिष्ठापयति। तूष्णीं यवमयम्। व्याख्यात।

**अथवा**

दक्षिणाप्राञ्चमृजुं सन्ततं ज्योतिष्मत्याधारमाधारयन् सर्वाणि इध्मकाष्ठानि संस्पर्शयति। व्याख्यात।

18. मखस्य शिशेऽसीति जुहवा ध्रुवां द्विस्त्रिर्वा समनक्ति। व्याख्यात।

19. घृतवति शब्दे जुहूपभृतावादाय दक्षिणा सकृदतिक्रान्तोऽयरेणाघारसंभेदं पञ्च प्रयाजान् प्राचो यजति। व्याख्यात।

**अथवा**

अथ यदि पुरोहितः पुरोधाकामो वा यजेत पूर्वार्धात्प्रथममवदानमवदाय पूर्वार्धे स्रुचो निधाय पूर्वार्धेऽग्नेर्जुहुयात्। व्याख्यात।

20. वेदेन ब्रह्मयजमानभागौ परिहरति। पृथक्पात्राश्यामितश्योः। व्याख्यात।

**अथवा**

आज्येन सोमत्वष्टाराविष्टवा जाघन्या पत्नीस्संयाजयन्ति आज्यस्य वा यथागृहीतेन। व्याख्यात।

**स. एकस्य प्रबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. वेदापौरुषेयत्वम्।

**अथवा**

निषेधः।

**अथवा**

नामधेयम्।

# A-II/5/2414/ 21

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. धर्मस्य लक्षणं किम्?
2. मीमांसकमते शाब्दबोधे मुख्यविशेष्यं किम्?
3. कर्मभेदबोधकप्रमाणानि कति? कानि च तानि?
4. अधिकारो नाम कः?
5. किं नाम तन्त्रम्?
6. दर्शपूर्णमासयोः कति यागाः? के च ते?
7. को नाम उपसंहारः?

**अथवा**

को नाम पर्युदासः?

8. मीमांसाशास्त्रे कति अध्यायाः?
9. आख्यातार्थः कः?

**अथवा**

विध्यर्थः कः?

10. भावनाया आकाङ्क्षात्रयं किम्?
11. अधिकारविधिमुदाहरत।
12. नियमविधेः किं लक्षणम्?

**अथवा**

परिसङ्ख्याविधेः किं लक्षणम्?

13. भाट्टैः कानि प्रमाणानि स्वीकृतानि?

**अथवा**

प्राभाकरैः कानि प्रमाणानि स्वीकृतानि?

14. अभिहितान्वयवादिनः के?

**अथवा**

अन्विताभिधानवादिनः के?

15. का नाम प्रमा?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अङ्गताबोधकप्रमाणानि सोदाहरणं लिखत।

17. शब्दभावनाया अकाङ्क्षात्रयं किम्?तच्छान्तये केषामन्वयो भवति?

18. धर्मे अष्टौ प्रमाणानि उदाहरत।

**अथवा**

आख्यातार्थविचारं प्रस्तुवत।

19. प्रवृत्तिक्रमं सोदाहरणं निरूपयत।

**अथवा**

प्रकरणस्य विनियोजकत्वमुपपादयत।

20. श्रुतिलिङ्गयोः प्राबल्यदौर्बल्यविचारं प्रस्तुवत।

**अथवा**

धर्मलक्षणविचारं प्रस्तुवत।

**स. एतस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. विध्यर्थविचारं प्रस्तुवत।

**अथवा**

क्रमबोधकप्रमाणानि विचारयत।

**अथवा**

अङ्गत्वलक्षणपरिष्कारं सदलकृत्यं निरूपयत।